परमं पदमभिवन्दन्ति । यत्र ह महाभागवतो ध्रुव औत्तानपादिरग्निनेन्द्रेण प्रजापतिना कश्यपेन धर्मेण च समकालयुग्भिः । सहबहुमानं दक्षिणतः क्रियमाण इदानीमपि कल्पजीविनामाजीव्य उपास्ते तस्य महानुभाव उपवर्णितः । स हि सर्वेषां ज्योतिर्गणानां ग्रहनक्षत्रादीनाम् अनिमिषेणाव्यक्तरंहसा भगवता कालेन भ्राम्यमाणानां स्थाणुरिवावष्टम्भ ईश्वरेण विहितः शश्वदवभासते । यथा मेढीस्तम्भ आक्रमणपशवः संयोजितास्त्रिभिः सवनैर्यथा स्थानमण्डलानि चरन्ति । एवं भगणा ग्रहादय एतस्मिन्नन्तर्बहिर्योगेन कालचक्र आयोजिता ध्रुवमेवावलम्ब्य वायुनोदीर्य्यमाणा आकल्पान्तं परितः क्रामन्ति । नभसि यथा मेघाः श्येनादयो वायुवशाः कर्मसारथयः परिवर्त्तन्ते । एवं ज्योतिर्गणाः प्रकृतिपुरुषसंयोगानुगृहीताः कर्मनिर्मितगतयो भुवि न पतन्ति ।" "सर्वे ध्रुवे निबद्धास्ते निबद्धा वातरश्मिभिः । एते वै भ्राम्यमाणास्ते यथायोगं वहन्ति वै । वायव्याभिरदृश्याभिः प्रबद्धा वातरश्मिभिः । परिभ्रमन्ति तद्बद्धाश्चन्द्रसूर्यग्रहा दिवि । यावत्तमनुपर्येति ध्रुवं वै ज्योतिषाङ्गणः । यथा नद्युदके नौस्तु उदकेन सहोह्यते । तथा देवगृहाणि स्युरुह्यन्ते वातरंहसा । तस्माद्यानि दृश्यन्ते व्योम्नि देवगृहा इति । यावन्त्यश्चैव ताराः स्युस्तावन्तोऽस्य मरीचयः । सर्वा ध्रुवनिबद्धास्ता भ्रमन्त्यो भ्रामयन्ति च । तैलपीडं यथा चक्रं भ्राम्यते भ्रामयन्ति वै । तथा भ्रमन्ति ज्योतींषि वातबद्धानि सर्वशः । अलातचक्रवद्यान्ति वातचक्रेरितानि तु । यस्मात् प्रवहते तानि प्रवहस्तेन च स्मृतः । एवं ध्रुवे नियुक्तोऽसौ भ्रमते ज्योतिषाङ्गणः । एष तारामयः प्रोक्तः शिशुमारे ध्रुवो दिवि" मत्स्यपु० १२६ अ०

वसुभेदे "धरो ध्रुवश्च सोमश्च अहश्चैवानिलोऽनलः । प्रत्यूषश्च प्रभासश्च वसवोऽष्टाविति स्मृताः" भा० आ० ६६ अ० । औत्तानपादिके "प्रियव्रतोत्तानपादौ मनोः स्वायम्भुवस्य तु । द्वौ पुत्रौ सुमहावीर्य्यौ धर्मज्ञौ कथितौ तव । तयोरुत्तानपादस्य सुरुच्यामुत्तमः सुतः । अभीष्टायामभूद्ब्रह्मन् ! पितुरत्यन्तवल्लभः । सुनीतिर्नाम या राज्ञस्तस्याभून्महिषी द्विज ! । स नृपोऽप्रीतिमांस्तस्यां तस्याश्चाभूद्ध्रुवः सुतः" विष्णुपु० ११ अ० ।

गानाङ्गे "ध्रुवा हि नाट्यस्य प्राणाः" तच्छास्त्रम् । १७रोमावर्त्तभेदे "आवर्त्तशाख्यादावर्त्तो रोमसंस्थानभङ्गिनाम्" ते च दशधा "द्वावुरस्यौ शिरस्यौ द्वौ द्वौ च रन्ध्रे परन्ध्रयोः । एको भाले ललाटे च दशावर्त्ता ध्रुवाः स्मृताः" शब्दार्थचि० "उग्रः पूर्वमघान्तको ध्रुवगणस्त्र्युत्तराणि स्वभूः" ज्यो० त० १८उत्तरात्रयरोहिणीषु नक्षत्रेषु "शिव ध्रुवक्षिप्रभे" मु० चि० । "ध्रुवगुरुकरमूलापौष्णभान्यर्कवारे" ज्यो० त० । २०नासाग्रभागे "अरुन्धती भवेज्जिह्वा ध्रुवो नासाग्रमुच्यते । विष्णोः पदानि भ्रूमध्यं नेत्रयोर्मातृमण्डलम्" काशीख० ४१ अ० "अरुन्धतीं ध्रुवञ्चैव विष्णोस्त्रीणि पदानि च । आसन्नमृत्युर्नो पश्येत् चतुर्थं मातृमण्डलम्" तत्रैव । तत्र वितर्के उत्प्रेक्षा तत्र "ध्रुवं स नीलोत्पलपत्रधारया शमीलतां छेत्तुमृषिर्व्यवस्यति" शकु० । स्थिरे "ध्रुवमपाये" पा० । "अपाये यदुदासीनं चलं वा यदि वाऽचलम् । ध्रुवमेवातदावेशात्" हरिका० निश्चिते "यो ध्रुवाणि परित्यज्य अध्रुवाणि विचिन्तयेत् । ध्रुवाणि तस्य नश्यन्ति अध्रुवं नष्टमेव च" हितो० । विष्णौ "व्यवसायो व्यवस्थानः संस्थानः स्थानदो ध्रुवः" विष्णुस० । २१यज्ञिये ग्रहपात्रभेदे पु० । "ततो ग्रहग्रहणमाध्रुवात्" कात्या० श्रौ० ७।५।१७ "आध्रुवग्रहग्रहणात्" कर्कः । २२ग्रहनक्षत्राद्यानयनोपयोगिनि अङ्कभेदे तत्र नक्षत्रध्रुवः सू० सि० उक्तः खगोलशब्दे २४२३ पृ० दर्शितः । संक्षेपस्तु सि० शि० प्रमिताक्षरोक्तः २४२५ पृ० दर्शितः । ग्रहध्रुवानयनन्तु "कल्पजचक्रहतास्तु गताब्दाः कल्पसमाविहृता भगणाद्याः । स्युर्ध्रुवका दिनकृद्गणान्ते प्राग्वदुदूक्चललेङ्गखगानाम्" सू० सि० । अत्र स्वार्थे क । ध्रुवनक्षत्रे "इत्थोत्थायोपनिष्क्रम्य ध्रुवं दर्शयति" गो० सू० "ध्रुवं नक्षत्रविशेषं दर्शयति पतिः" सं० त० रघु० । "शरत्प्रसन्नैर्ज्योतिर्भिः विभावर्य्य इव ध्रुवम्" रघुः । "स्फुटतरमुपरिष्टादल्पमूर्त्तेर्ध्रुवस्य स्फुरति सुरमुनीनां मण्डलं व्यक्तमेतत्" माघः । २३आवश्यके धृतिहोमशब्दे दर्शित गोभिलवाक्ये "ध्रुवा आहुतीर्जुहोति" । "अष्टकामाघ्यम्युदयास्तीर्थपात्रोपपत्तयः । पितृणामतिरेकोऽयं मासिकान्नात् ध्रुवः स्मृतः" देवीपु० "मासिकान्नात् अमावस्याश्राद्धादतिरेकः अष्टकादिश्राद्धगणो ध्रुव आवश्यकः" श्रा० त० रघु० आवश्यकत्वञ्च अवश्यकर्तव्यत्वं तेनाकरणे प्रत्यवायजनकत्वात् नित्यत्वमिति फलितम् । सन्तते निश्चिते "जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च" गीता "यदावगच्छेदायत्यामाधिक्यं ध्रुवमात्मनः" मनुः